# संस्कृतवार्ता:

दिनाङ्क :-  27/02/2025 सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>आदौ मुख्यवार्ताः</u>

- महाकुम्भ:  एकतायाः महायज्ञ:  इति प्रवदन् महाकुम्भं प्राशंसत् प्रधानमन्त्री, अभिव्यक्तवान् च यत् भारतं स्व- रिक्थेषु वर्तते गौरवान्वितम् ।
- वित्तमन्त्रिणा निर्मला सीतारामन् इत्यनया निगदितं यत् वैश्विकव्यवस्था विकसितदेशैः नैव निर्धारयिष्यते। व्यापारे प्रौद्योगिक्यां च नूतन- विश्वव्यवस्थायाम् महत्वपूर्णां भूमिकां निभालयिष्यति भारतम्।
- संयुक्त-राष्ट्र-मानवाधिकार-परिषदि भारतेन पाकिस्तानं भृशं कट्वालोचितम्। प्रोक्तं च यत् पाकिस्तानम् अन्ताराष्ट्रिय-सहयोगे निर्भर: एक: असफल: देश: अस्ति।
- पश्चिमीय-विक्षोभस्य सक्रियतया हिमाचलप्रदेशे अतिवृष्टि: हिमपात: च जायते। ऋतुविभागेनाद्य उत्तराखण्डस्य विविधेषु भागेषु अत्यधिक-हिमवृष्ट्या: कारणेन सुरक्षादृशा पीत-सञ्चेतना प्रख्यापिता।

---------------------------------------

<u>महाकुम्भ:</u>

महाकुम्भ:  एकतायाः महायज्ञ:  इति प्रवदन् महाकुम्भस्य प्रशंसां कुर्वन् च , प्रधानमन्त्री नरेन्द्रमोदी  अद्य अभिव्यक्तवान् यत् भारतं स्वस्य न्यासस्योपरि गर्वं  करोति, नूतनया  ऊर्जया सह अग्रे गच्छदस्ति इति। प्रधानमन्त्री अवदत् यत् महाकुम्भस्य सफलता आधुनिकप्रबन्धनव्यवसायिकानां, नियोजनस्य, नीतिविशेषज्ञानां च कृते  अध्ययनस्य विषयो विद्यते  इति। असौ  दृढतया उक्तवान् यत् संसारे कस्मिन् अपि देशे एतादृशस्य समानान्तरस्य उदाहरणं नास्ति तथा च चतुश्चत्वारिंशदधिकैकशतवर्षाणाम् अनन्तरं, सन्ताः पुनः

विकसितभारतस्य कृते नूतनम् सन्देशम् अददुः । श्रीमोदी अद्य सामाजिकान्तार्जालीयालेखे एतान् विचारान् अलिखत्। प्रयागराजनगरे तिसृणां नदीनां सङ्गमतटे कोटिशः जनाः कथं समागच्छन् इति सकलं हि विश्वम् आश्चर्येण अपश्यत् इत्यपि श्रीमोदी कथितवान्।

---------------------------------------

**वैष्णव:- प्रयागराजस्थानकम्**

रेलमन्त्री अश्विनीवैष्णव: अद्य विज्ञापितवान् यत् प्रयागराजे महाकुम्भाय षोडश-सहस्राधिकानि रेलयानानि सञ्चालितानि। प्रयागराज-रेल-स्थानके वार्ताहरै: समं संलापे श्रीवैष्णव: अवोचत् यत् प्रयागराजत: भूयोऽपि पञ्चाशल्लक्षाधिक-चतुष्कोटिसङ्ख्यका: जना: रेलयानै: गमनागमनस्य स्वयात्रां सम्पूरितवन्त:। श्रीवैष्णव: सूचितवान् यत् रेलविभागेन विगत-सार्ध-द्वि-वर्षत: अस्मै कार्याय स्वक्षमता प्रदर्शिता अपि च प्रायश: पञ्चसहस्रकोटि- रूप्यकाणां निवेश: कृत:। असौ प्रख्यापितवान् यत् महाकुम्भाय अनुष्ठानाय एकविंशत्यधिकं आन्तभौममार्गा: उपरिमार्गा: च निर्मिता:। श्रीवैष्णव- प्रोक्तवान् यत् यात्रिणां सुगमयात्रायै एषा योजना लक्ष्यकेन्द्रितासीत्।

---------------------------------------

**वित्तमन्त्री निर्मला सीतारामन**

वित्तमन्त्री निर्मला-सीतारामन इत्येषा अवदत् यत्, वैश्विकरूपेण सर्वासां समस्यानां विरुद्धं भारतं तीव्रवृद्ध्या अग्रे गच्छतिति। अद्य नवदिल्ल्याम् वार्ताहर-सम्मेलनम् अभिसंबोधयन्ती वित्तमन्त्री अवोचत् यत् वैश्विक-आपूर्तिशृङ्खला केन्द्रीकृतसंकटान् जनयति | अनया अग्रे समुदीरितं यत् अयं समयः रुचिकरः विद्यते तावत् समाह्वानकरोऽपि वर्तते | मन्त्रिणा निगदितं यत् वैश्विकव्यवस्था विकसितदेशैः नैव निर्धारयिष्यते | व्यापार: प्रौद्योगिकी च नूतनायां वैश्विकव्यवस्थायाम् महत्वपूर्ण- भूमिकां निभालयिष्यत: भारताय च भागग्रहणं महनीयं भविष्यति | श्रीमती सीतारामनः अवदत् यत् विकसितदेशेभ्यः अपि प्रौद्योगिक्याः प्रतिभायाः च आवश्यकता वर्तते इति।

---------------------------------------

## दिल्ली-विधानसभा

दिल्ली विधानसभायाम् अद्य पुन: चर्चा समारब्धा, यस्यां चर्चायां विगत-आप-दलस्य सर्व-कारस्य आसव-नीति-विषये सी ए जी इत्यस्य विवरणविषये परिचर्चा जाता। चर्चाया: प्रारम्भं कुर्वन् मालवीय-नगरस्य विधायक: सतीश-उपाध्याय: प्रावोचत् यत् सी ए जी विवरणेन अभिज्ञायते यत् एकविंशच्युत्तर-द्वि-सहस्रतमे वर्षे क्रियान्वितेन आसवनीति-कारणेन सर्वकारीय-कोषस्य द्वि-सहस्र-कोट्यधिकस्य राजस्वस्य हानि: अजायत। अन्यया विधानसभा-सदस्यया शिखा रॉय-इत्यनया याच्ञा कृता यत् विवरणमनुसृत्य अन्वीक्षणं नूनमेव भवतु। सहैव दोषिणो निरूध्य कार्यान्वयनमपि अनया अभियाचितम् अस्ति । ध्येयमस्ति यद् दिवस-द्वय पूर्वं मुख्यमन्त्रिणा रेखा-गुप्तया सी ए जी विवरणस्य प्रस्तवन-पूर्वकम् अस्य काण्डस्य उद्घाटनं कृतम् आसीत्। अत: पूर्वम् आम आदमी पार्टीति दलस्य विधायकै: अद्य विधानसभाया: बहिस्तात् विरोध- प्रदर्शनम् आचरितम्। एतै: आरोपा: आरोपिता: यदिमे विधानसभायाम् प्रवेष्टुं नैव अनुमता:, एष: पदक्षेप: अलोकतान्त्रिक: अस्ति इत्युक्त्वा विपक्ष-नेत्री आतिशी सञ्चार-माध्यमानि प्रत्यापादयत् यत् आरक्षि-अधिकारिणो निगदन्तो वर्तन्ते यत् आप-विधायका: निलम्बायिता: सन्ति अत: ते विधानसभां प्रवेष्टुं नार्हन्ति।

---------------------------------------

## उद्योगमन्त्री

केन्द्रीय-वाणिज्योद्योगमन्त्री पीयूषगोयल: अद्य मुम्बय्यां भारत-कॉलिंग-इत्याख्यस्य सम्मेलनस्य उद्घाटनं कृतवान्। सम्मेलनं सम्बोधयता पीयूष-गोयलेन प्रतिपादितं यत् मेक इनइण्डिया-डिजिटल इण्डिया-स्टार्टअप इण्डिया-आत्मनिर्भर-भारत-इत्येतान् उपक्रमान् समेत्य प्रशासनस्य कार्यनीतिक-पदक्षेप: अद्भुत-स्तरे नवाचारस्य आधारभूतावसंरचनायाश्च विकासम् आर्थिक-परिवर्तनम् च समेधयति। अनेनोक्तं यत् देशे बृहदवसरा: सृज्यन्ते अपि च कौशल-निर्माणं अर्थव्यवस्थां प्रबलं करोतीति। कौशलविकासमाध्यमेन भविष्यकाले इतोऽपि वृत्यवसरा: योजिता: भविष्यन्ति।

---------------------------------------

## राष्ट्रपति:-गुजरात यात्रा

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: या हि चतुर्दिवसीय-यात्रान्तर्गतम् अद्य गुजरात- प्रदेशं सम्प्राप्तवती तत्रासौ अद्य प्रतिष्ठितैकता-प्रतिमाया: भ्रमणं कृत्वा लौहपुरूषाय सरदार वल्लभभाईपटेलवर्याय पुष्पाञ्जलिं समर्पितवती। अनया एकतानगरे नैकेषाम् प्रमुखाणाम् आकर्षणानामपि अवलोकनं कृतवती। स्वयात्राया: द्वितीये दिने राष्ट्रपति: अद्य अहमदाबादनगरे राष्ट्रिय-डिजाइन-इत्येतस्य संस्थानस्य चतुश्चत्वारिंशत्तमे दीक्षान्तसमारोहे सम्मिलिता भविष्यति।

---------------------------------------

## हिमाचलप्रदेश:-वृष्टिपात:

पश्चिमीय-विक्षोभस्य सक्रियतया हिमाचलप्रदेशे अतिवृष्टि: हिमपात: च जायमानो वर्तते। हिमाचलप्रदेशस्य उपरि-क्षेत्रेषु अतिहिमपातेन वृष्ट्या च नारङ्गवार्णिकी सञ्चेतना प्रसारिता। ऋतुविभागेनाद्य उत्तराखण्डस्य विविधेषु भागेषु अत्यधिक-वृष्ट्या: तुषारवृष्ट्याश्च कारणेन पीतवार्णिकी जन-सञ्चेतना प्रख्यापिता। एतदतिरिच्य श्व: उत्तरकाशी-चमोली-रूद्रप्रयाग-टिहरीगढवाल-पिथौरागढ-बागेश्वर-क्षेत्राणां पर्वतीय-स्थानेषु अत्यधिकं हिमापातस्य अनुमानं समाश्रित्य नारङ्गवार्णिकी सञ्चेतना विज्ञापिता। जनै: आग्रह: कृत: यते प्रतिकूल-ऋतौ अवधानेन सतर्कतया च निवसेयु: ।

---------------------------------------

## यूरोपीयायोगस्याध्यक्षाया: दिल्ली यात्रा

यूरोपीय-आयोगस्य अध्यक्षा उर्सुला वॉन डेर लेयेन वर्या अद्य दिल्लीं सम्प्राप्ता वर्तते। दिल्ल्यां तदीय-स्वागत सपर्या स्वास्थ्य-परिवार-कल्याण-राज्यमन्त्रिणा अनुप्रिया पटेल-वर्यया विमान-पत्तनं गत्वैव समाचरिता। एषा अद्य सायं विदेश-मन्त्रिणं डॉ. एस. जयशंकरं मेलितवती। श्व: च प्रधानमन्त्रिणा श्रीनरेन्द्र मोदिना साकं प्रतिनिधि-मण्डल-स्तरीयं मन्त्रणोपवेशनं विधास्यति। यात्रेयं यूरोपीय-संघस्य आयुक्तानां प्रथमा भारत यात्रा वर्तते। एतेषु सप्तविंशति: आयुक्तेषु द्वाविंशति: आयुक्तास्तु भारतस्य द्वि-द्विवसीयायां यात्रायां सन्ति।

---------------------------------------

## भारतेन पाकिस्तानमालोचितम्

संयुक्त-राष्ट्र-मञ्चस्य मानवाधिकार-परिषदः पञ्च- पञ्चाशत्तमस्य सत्रस्य सप्तमे समुपवेशने भारतेन पाकिस्तानस्य भृशं कट्वालोचना विहिता। प्रोक्तं च यत् पाकिस्तानम् अन्ताराष्ट्रिय-सहयोगे निर्भरः एकः असफलः देशः अस्ति। जिनेवा नगरे भारतस्य स्थायी मिशन सदस्यः क्षितिजः त्यागी पाकिस्तानस्य नेतृजनेषु आरोपान् आरोपितवान् यत् ते स्वीय-सैन्य-आतंकवादी-परिसरेभ्यः मृषापवादानेव प्रसारयन्ति अमुना साम्प्रतिकेषु वर्षेषु क्षेत्रस्य उल्लेखनीयानां राजनीतिक-सामाजिक-आर्थिक-प्रगतीनाम् उदाहरण-पुरस्सरं प्रतिपादितं यत् जम्मू-कश्मीरं लद्दाख इति ललाटाक्ष-क्षेत्रञ्च सर्वदा भारतस्यैव अभिन्नाङ्गत्वेन वर्तिष्यन्ते। त्यागी वर्येण ओ आई सी इति इस्लामिक-सहयोग-संघटनस्य मुखपत्र-रूपेण उपयोगार्थं पाकिस्तानं भृशं भार्त्सितम्। प्रोदितं च यत् एतत् नितान्तमेव दुर्भाग्यपूर्णमस्ति यत् परिषदः समयः एकेन एतन्निभेन देशेन विनष्टीकृतः यः खलु अस्थैर्येण विवर्धते, अन्ताराष्ट्रिय-सहाय्येन च जीवति। सहैव असौ न्यगदत् यत् भारतं लोकतन्त्रस्य, प्रगतेः प्रजानां सम्मानस्य च सुनिश्चितीकरणे केन्द्रितमस्ति। पाकिस्तानेन भारतात् एतानि मूल्यानि सन्ति शिक्षितव्यानि।

।। इति वार्ता:।।